मणिपर्ब्बतः, पुं, ( मणीनां पर्ब्बतः । ) गिरिविशेषः । यथा,—

"ततोऽभ्ययाद्गिरिश्रेष्ठमभितो मणिपर्ब्बतम् ।
तत्र पुण्या बभुर्वाता ह्यभवंश्चामलाः प्रभाः ॥
मणीनां हेमवर्णानामभिभूय दिवाकरम् ।
तत्र वैदूर्य्यवर्णानि ददर्श मधुसूदनः ॥
सतोरणपताकानि द्वाराणि शिखराणि च ।
विद्युद्ग्रथितमेघाभः प्रबभौ मणिपर्ब्बतः ॥
हेमचित्रवितानैश्च प्रासादैरुपशोभितः ।
तत्र ता हेमवर्णाभा ददर्श मधुसूदनः ॥
गन्धर्व्वासुरमुख्यानां प्रिया दुहितरस्तथा ।
ददर्श पृथुलश्रोणीः संरुद्धा गिरिकन्दरे ॥
नरकेण समानीता रक्ष्यमाणाः समन्ततः ॥"
इति महाभारते हरिवंशे नरकवधाध्यायः ॥

मणिपूरं, क्ली, षट्चक्रान्तर्गतनाभिमध्यस्थतृतीयचक्रम् । यथा,—

"तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम् ।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः ।
मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते ॥
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ।
शिवेनाधिष्ठितं पद्मं विश्वालोकनकारणम् ॥"
इति तन्त्रम् ॥

तत्तु स्वाधिष्ठानपद्मस्योर्द्ध्वदेशे तिष्ठति । यथा,—

"एतत्पद्मस्योर्द्ध्वदेशे महापद्मं सुदुर्लभम् ।
दशपत्रं नीलवर्णं सजलं घोररूपकम् ।
डादिफान्तैः सचन्द्रैश्च पङ्कजस्यातिशोभनम् ॥
तन्मध्ये बीजकोषे निवसति सततं वह्निबीजं सुसिद्धं
वाह्ने तत्त्रिपुराख्यं नवतपननिभं स्वस्तिकं तत्त्रिभागे ।
स्वर्णकाख्यमिदं देवि ! सर्व्वदेवप्रपूजितम् ।
साकारं वह्निबीजञ्च सदैव मेघवाहनम् ॥
रुद्रालयं हि तत्रैव महामोहस्य नाशनम् ।
भद्रकाली महाविद्या वामभागे सुशोभिता ॥"
इति निर्व्वाणतन्त्रे ६ पटलः ॥

तत्र देवतीर्थं यथा, रुद्रयामले ।

मणिपूरे देवतीर्थं पञ्चकुण्डं सरोवरम् ।
तत्र श्रीकामनातीर्थं स्नाति यो मुक्तिमिच्छति ॥"

(मणीनां पूरोऽत्र ।) स्वनामख्यातदेशश्च ॥ (यथा, महाभारते १ । २१८ । २३ ।

"चित्राङ्गदां पुनर्द्रष्टुं मणिपूरपुरं ययौ ॥")

मणिबन्धः, पुं, ( मणिर्बध्यते यत्र । अधिकरणे घञ् ।) प्रकोष्ठपाण्योः सन्धिस्थानम् । इत्यमरटीकायां भरतः । कब्जा इति भाषा ॥ स च करस्यादिभागः । ( यथा, अभिज्ञानशकुन्तले ३ अङ्कः ।

"मणिबन्धान्नजितमिदं संक्रान्तोशीरपरिमलं तस्याः ।")

तत्पर्य्यायः । मणिः २ । इति हेमचन्द्रः ॥ करग्रन्थिः ३ करग्रन्थिकः ४ । इति शब्दरत्नावली ॥ तस्य शुभाशुभलक्षणं यथा,—

"मणिबन्धैर्निगूढैश्च सुश्लिष्टशुभसन्धिभिः ।
हृपा हीनैः करच्छेदैः सशब्दैर्धनवर्ज्जिताः ॥"
इति गारुडे ६५ अध्यायः ॥

मणिभद्रः, पुं, ( मणिषु भद्रः, यद्वा मणिभिर्भद्रमस्य । मणिमुक्तादिधनाधिक्यादस्य तथात्वम् ।) जिनानां पूर्ब्बयक्षविशेषः । तत्पर्य्यायः । जम्भलः २ पूर्ब्बयक्षः ३ यक्षेन्द्रः ४ । इति त्रिकाण्डशेषः ॥ ( प्रधानयक्षभेदः । यथा, महाभारते । ३ । ६४ । १२७ ।

"ऋते त्वां मानुषीं मर्त्त्यां न पश्यामि महावने ।
तथा नो यक्षराड़द्य मणिभद्रः प्रसीदतु ॥"

यथा च कथासरित्सागरे । १३ । १६५ ।

"अस्मद्देशे पुरस्तान्तर्मणिभद्र इति श्रुतः ।
पूर्ब्बैः कृतप्रतिष्ठोऽस्ति महायक्षः प्रभावितः ॥")

मणिभूमिः, स्त्री, ( मणीनां भूमिः आकरः । मणिमयी भूमिरिति वा ।) रत्नस्य खनिः । तत्पर्य्यायः । कुट्टिमम् २ । इति शब्दरत्नावली ॥

मणिमण्डपः, पुं, ( मणिमयः मण्डपः । ) रत्नमयगृहम् । यथा, रुद्रयामले वगलास्तोत्रे ।

"मध्ये सुधाब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥"

मणिमन्थं, क्ली, ( मणिरिव मथ्यते इति मणि+मन्थ+कर्म्मणि घञ् । ) सैन्धवलवणम् । इति राजनिर्घण्टः ॥ ( मणयः मथ्यन्ते उपलान् विदार्य्य गृह्यन्ते अत्रास्मादिति । मन्थ+अधिकरणादौ घञ् ।) पर्ब्बतविशेषः । इति माणिमन्थशब्दटीकायां भरतः ॥ (यथा, महाभारते । १३ । १८ । ३३ ।

"मणिमन्थेऽथ शैले वै पुरा सम्पूजितो मया ॥")

मणिमान्, [ त् ] त्रि, मणिविशिष्टः । रत्नभूषितः । ( यथा, भागवते । ३ । १५ । ४१ ।

"विद्युत्क्षिपन्मकरकुण्डलमण्डनार्ह-
गण्डस्थलोन्नसमुखं मणिमत्किरीटम् ॥")

मणिरस्तीति मतुप्प्रत्ययेन निष्पन्नः ॥ ( पुं, नागविशेषः । यथा, महाभारते । २ । ६ ।

"मणिमान् कुण्डधारश्च कर्कोटकधनञ्जयौ ॥"

राक्षसभेदः । स च कुवेरस्य सखा । यथा, महाभारते । ३ । १६० । ५७ ।

"सखा वैश्रवणस्यासीन्मणिमान्नामराक्षसः ॥"

पश्चिमस्थदेशभेदः । यथा, वृहत्संहितायाम् । १४ । २० ।

"अपरस्यां मणिमान् मेघवान् वनौघः क्षुरार्पणोऽस्तगिरिः ॥"

स्त्री, पुरभेदः । यथा, महाभारते ।३।९६।४।

"इल्वलो नाम दैतेय आसीत् कौरवनन्दन ! ।
मणिमत्यां पुरि पुरा वातापिस्तस्य चानुजः ॥")

मणिमाला, स्त्री, ( मणिनिर्म्मिता माला शाकपार्थिवादिवत् समासः । ) हारः । दन्तक्षतविशेषः । इति मेदिनी । ले, १६० ॥ ( मणिनिर्म्मिता माला यस्याः ।) लक्ष्मीः । इति शब्दरत्नावली ॥ दीप्तिः । इतिशब्दमाला ॥ (छन्दोभेदः । यथा, छन्दोमञ्जर्य्याम् । "त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः ।" अधिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥ )

मणिरागं, क्ली, (मणेरिव रागो वर्णोज्ज्वलमस्य ।) हिङ्गुलम् । इति राजनिर्घण्टः ॥ (मणेः रागः ।) मणेर्वर्णे पुं ॥ ( गुणादयोऽस्य हिङ्गुलशब्दे विधेयाः ॥ )

मणिवः, पुं, नागविशेषः । मणिशब्दादस्त्यर्थे वप्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

मणिवीजः, पुं, ( मणिरिव दर्शनीयं वीजं यस्य । ) दाड़िम्बवृक्षः । इति राजनिर्घण्टः ॥

मणिसरः, पुं, ( मणिभिः स्रियते गम्यते ग्रथ्यते इतिभावः । सृ+कर्म्मणि अप् ।) मुक्ताहारः । यथा, गीतगोविन्दे ७ सर्गः ।

"घटयति सघने कुचयुगगगने मृगमदरुचिरूषिते ।
मणिसरममलं तारकपटलं नखपदशशिभूषिते ॥"

मणी, स्त्री, (मणि+कृदिकारादिति पक्षे ङीष् ।) मणिः । इति भरतद्विरूपकोषः ॥

मणीचकं, क्ली, ( मणीम् चकते प्रतिहन्ति शोभया इति । चक+अच् ।) चन्द्रवर्णरूप्यम् । तत्पर्य्यायः । इन्दुकान्तः २ । इति त्रिकाण्डशेषः ॥ ( शाकद्वीपस्य वर्षविशेषः । यथा, मात्स्ये । १२१ । २३ ।

"श्यामपर्ब्बतवर्षं तु मणीचकमिति स्मृतम् ॥")

मणीचकः, पुं, ( मणी+चक्+अच् । ) मत्स्यरङ्गपक्षी । यथा,—

"भम्पाशी मत्स्यरङ्गः स्याज्जलमद्गुर्मणीचकः ।"
इति हारावली ॥

मणीव, अ, मणितुल्यम् । मणिशब्देन सह इवशब्दस्य षष्ठीतत्पुरुषसमासः । प्रथमाद्विवचनान्तमणिशब्दात् इवार्थवशब्देन वाशब्देनाप्येवं रूपम् यथा,—

"मणीवोष्ट्रस्येति तु इवार्थे वशब्दो वाशब्दो वा बोध्यः ।"
इति सिद्धान्तकौमुदी ॥

मणीवकं, क्ली, ( मणीव+संज्ञायां कन् । ) पुष्पम् । इति हेमचन्द्रः ॥

मण्टपी, स्त्री, ( मण्टमुन्मादं पाति रक्षतीति मण्ट+पा+कः । जातौ संज्ञायां वा ङीष् । ) क्षुद्रोपोदकी । इति राजनिर्घण्टः ॥

मण्डः, पुं, ( मण्डते इति मठि+अच् । ) वटकविशेषः । माड़ाँ इति हिन्दी भाषा । यथा,—

"समितां मर्द्दयेदाज्यैर्क्षेणापि च सन्नयेत् ।
अस्यास्तु वटकं कृत्वा पचेत् सर्पिषि नीरसम् ॥
एलालवङ्गकर्पूरमरिचाद्यैरलङ्कृते ।
मज्जयित्वा सितापाके ततस्तञ्च समुद्धरेत् ।
अयं प्रकारः संसिद्धो मण्ठ इत्यभिधीयते ॥"

अस्य गुणाः ।

"मण्ठस्तु वृंहणो वृष्यो बल्यः सुमधुरो गुरुः ।
पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः ॥"